योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ११८

अष्टादशोत्तरशततमः सर्गः ११८

श्रीवसिष्ठ उवाच ।

इमां सप्तपदां ज्ञानभूमिमाकर्णयानघ ।

नानया ज्ञातया भूयो मोहपङ्के निमज्जसि ।। १

वदन्ति बहुभेदेन वादिनो योगभूमिकाः ।

मम त्वभिमता नूनमिमा एव शुभप्रदाः ।। २

अवबोधं विदुर्ज्ञानं तदिदं सप्तभूमिकम् ।

मुक्तिस्तु ज्ञेयमित्युक्तं भूमिकासप्तकात्परम् ।। ३

सत्यावबोधो मोक्षश्चैवेति पर्यायनामनी ।

सत्यावबोधो जीवोऽयं नेह भूयः प्ररोहति ।। ४

ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता ।

विचारणा द्वितीया तु तृतीया तनुमानसा ।। ५

सत्त्वापत्तिश्चतुर्थी स्यात्ततोऽसंसक्तिनामिका ।

पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता ।। ६

आसामन्ते स्थिता मुक्तिस्तस्यां भूयो न शोच्यते ।

एतासां भूमिकानां त्वमिदं निर्वचनं श्रृणु ।। ७

स्थितः किं मूढ एवास्मि प्रेक्ष्येऽहं शास्त्रसज्जनैः ।

वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः ।। ८

शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकम् ।

सदाचारप्रवृत्तिर्या प्रोच्यते सा विचारणा ।। ९

विचारणाशुभेच्छाभ्यामिन्द्रियार्थेष्वसक्तता ।

यात्र सा तनुता भावात्प्रोच्यते तनुमानसा ।। १०

भूमिकात्रितयाभ्यासाच्चित्तेऽर्थे विरतेर्वशात् ।

सत्यात्मनि स्थितिः शुद्धे सत्त्वापत्तिरुदाहृता ।। ११

दशाचतुष्टयाभ्यासादसंसङ्गफलेन च ।

रूढसत्त्वचमत्कारात्प्रोक्ताऽसंसक्तिनामिका ।। १२

भूमिकापञ्चकाभ्यासात्स्वात्मारामतया दृढम् ।

आभ्यन्तराणां बाह्यानां पदार्थानामभावनात् ।। १३

परप्रयुक्तेन चिरं प्रयत्नेनार्थभावनात् ।

पदार्थाभावनानाम्नी षष्ठी संजायते गतिः ।। १४

भूमिषट्कचिराभ्यासाद्भेदस्यानुपलम्भतः ।

यत्स्वभावैकनिष्ठत्वं सा ज्ञेया तुर्यगा गतिः ।। १५

एषा हि जीवन्मुक्तेषु तुर्यावस्थेह विद्यते ।

विदेहमुक्तिविषयस्तुर्यातीतमतः परम्।। १६

ये हि राम महाभागाः सप्तमीं भूमिकां गताः ।

आत्मारामा महात्मानस्ते महत्पदमागताः ।। १७

जीवन्मुक्ता न सज्जन्ति सुखदुःखरसस्थितौ ।

प्रकृतेनार्थकार्याणि किंचित्कुर्वन्ति वा न वा ।। १८

पार्श्वस्थबोधिताः सन्तः सर्वाचारक्रमागतम् ।

आचारमाचरन्त्येव सुप्रबुद्धवदक्षतम् ।। १९

आत्मारामतया तांस्तु सुखयन्ति न काश्चन ।

जगत्क्रियाः सुसंसुप्तान्नूपालोकाः स्त्रियो यथा ।।२०

भूमिकासप्तकं चैतद्धीमतामेव गोचरम् ।

न पशुस्थावरादीनां न च म्लेच्छादिचेतसाम् ।। २१

प्राप्ता ज्ञानदशामेतां पशुम्लेच्छादयोऽपि ये ।

सदेहा वाप्यदेहा वा ते मुक्ता नात्र संशयः ।। २२

ज्ञप्तिर्हि ग्रन्थिविच्छेदस्तस्मिन्सति हि मुक्तता ।

मृगतृष्णाम्बुबुद्ध्यादि शान्तिमात्रात्मकस्त्वसौ ।।२३

ये तु मोहात्समुत्तीर्णा न प्राप्ताः पावनं पदम् ।

आस्थिता भूमिकास्वासु स्वात्मलाभपरायणाः ।। २४

सर्वभूमिगताः केचित्केचिद्द्वित्रैकभूमिकाः ।

भूमिषड्गताः केचित्केचित्सप्तकभूमिकाः ।। २५

भूमित्रयगताः केचित्केचिदन्त्या भुवं गताः ।

भूचतुष्टयगाः केचित्केचिद्भूमिद्वये स्थिताः ।। २६

भूम्यंशभाजनाः केचित्केचित्सार्धत्रिभूमिकाः ।

केचित्सार्धचतुर्भूगाः सार्धषडभूमिकाः परे ।। २७

विवेकिनो नरा लोके चरन्त इति भूमिषु ।

ग्रहायतनतापस्य दृशावेशेषु संस्थिताः ।। २८

ते हि धीराः सुराजानो दशास्वासु जयन्ति ये ।

तृणायतेऽत्र दिग्दन्तिघटाभटपराजयः ।। २९

ये तासु भूमिषु जयन्ति हि ये महान्तो

वन्द्यास्त एव हि जितेन्द्रियशत्रवस्ते ।

सम्राड्विराडपि च यत्र तृणायते वै

तस्मात्परं जगति ते समवाप्नुवन्ति ।। ३०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूत्पत्तिप्रकरणे ज्ञानभूमिकोपदेशो नामाष्टादशोत्तरशततमः सर्गः ।।११८।।